नामांक Roll No.

| | | | | | | |
|---|---|---|---|---|---|---|
| | | | | | | |

No. of Questions — 20

No. of Printed Pages — 3

# VU—35–2—Dharm Shas. II

# वरिष्ठ उपाध्याय परीक्षा, 2010

## धर्मशास्त्रम्

## द्वितीयपत्रम्

समय : $3\frac{1}{4}$ घण्टे

पूर्णांक : 60

**परीक्षार्थिभ्यः सामान्यनिर्देशाः**

(1) परीक्षार्थिभिः सर्वप्रथमं स्वप्रश्नपत्रोपरि नामाङ्कः अनिवार्यतः लेख्यः ।

(2) सर्वे प्रश्नाः अनिवार्याः ।

(3) प्रत्येक प्रश्नस्योत्तरमुत्तरपुस्तिकायामेव देयम् ।

(4) प्रत्येक प्रश्नभागस्योत्तरं क्रमानुसारमेकत्रैव लेखितव्यम् ।

(5) प्रथम प्रश्नस्य चत्वारः ( i, ii, iii एवं iv ) भागाः सन्ति । प्रत्येक भागस्य उत्तरस्य चत्वारः ( **अ, ब, स** एवं **द** ) विकल्पाः सन्ति । समुचित विकल्पस्य उत्तराक्षरं उत्तर-पुस्तिकायां निम्नलिखित तालिकां निर्माय एकस्मिन् स्थाने एव लेखनीयानि ।

| प्रश्न क्रमाङ्कः | समुचित उत्तराक्षरम् |
|---|---|
| 1. (i) | |
| 1. (ii) | |
| 1. (iii) | |
| 1. (iv) | |

1. (i) वाणिज्यं कीदृशं भवति ?

(अ) सत्यं (ब) अनृतं

(स) सत्यानृतं (द) न किमपि । 1

(ii) तप: कथं नश्यति ?

(अ) विस्मयेन (ब) अनृतेन

(स) अपवादेन (द) परिकीर्त्तनेन । 1

(iii) विप्र: कथं शुद्ध्यति ?

(अ) जलेन (ब) वाहनायुद्धाभ्यां

(स) प्रतोदेन (द) यष्ट्या । 1

(iv) स्त्रिय: शुद्धि: कथं जायते ?

(अ) मृत्तिकया (ब) वेगेन

(स) रजसा (द) संन्यासेन । 1

2. सुखमूलं किमस्ति ? 1

3. ब्रह्मलोकस्य ईश: कोऽस्ति ? 1

4. ब्राह्मं तेज: केन विनश्यति ? 1

5. सर्वेषु दानेषु कीदृशं दानं विशिष्टं मन्यते ? 1

6. कीदृश: धान्यसंग्राहक: श्रेष्ठ: मत: ? 1

7. के पञ्चमहायज्ञा: ? नामानि लिखत । 2

8. क: सनातन: धर्म: ? 2

9. कीदृशं सूर्यं न पश्येत् ? 2

10. घातका: कतिविधा: ? तेषां नामानि लिखन्तु । 2

11. धुर्यलक्षणं किम् ? 2

12. मानवेन कै: कर्मभि: पूर्वजाति: स्मर्यते ? 2

13. मृत्युः कैः दोषैः मनुष्यं हन्ति ? 3

14. नरजाः मलाः कतिविधाः ? नामानि लिखत । 3

15. द्रव्याणां शुद्धिः कथं भवति ? ग्रन्थानुसारं स्पष्टयत । 6

16. कस्मिन् काले वेदाध्ययनं न कर्त्तव्यम् ? 6

17. अधस्तनेषु श्लोकेषु कयोश्चिद् **द्वयोः** सप्रसङ्ग व्याख्या कार्या — 6

(क) सर्वान्परित्यजेदर्थान्स्वाध्यायस्य विरोधिनः ।

यथातथाध्यापयंस्तु सा ह्यस्य कृतकृत्यता ॥

(ख) पाषण्डिनो विकर्मस्थान्वैडालव्रतिकान्छठान् ।

हेतुकान्बकवृत्तींश्च वाङ्मात्रेणापि नार्चयेत् ॥

(ग) यज्ञार्थं पशवः सृष्टाः स्वयमेव स्वयंभुवा ।

यज्ञस्य भूत्यै सर्वस्य तस्माद्यज्ञे वधोऽवधः ॥

(घ) प्रोक्षितं भक्षयेन्मांसं ब्राह्मणानां च काम्यया ।

यथाविधि नियुक्तस्तु प्राणानामेव चात्यये ॥

18. धर्मस्य परिभाषां विलिख्य धर्मस्य उपादानं किम् ? स्पष्टयत । 5

19. बौधायन धर्मसूत्रस्य परिचयो देयः । 5

20. यथेच्छं **द्वयोः** स्मृतिकारयोः व्यक्तित्वं कृतित्वञ्च विलिख्यताम् — 5

(i) मनुः

(ii) पराशरः

(iii) कात्यायनः

(iv) कमलाकरभट्टः ।